শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ সপ্তদশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ সপ্তদশঃ সর্গঃ ॥

## রাজমার্গসুষমামৱলোকযতঃ সুহৃদাং ৱচাংসি শৃণ্ৱতশ্চ শ্রীরামস্য পিতুর্ভৱনে প্রৱেশঃ

স রামো রথমাস্থায সম্প্রহৃষ্টসুহৃজ্জনঃ।
পতাকাধ্ৱজসম্পন্নং মহার্হাগুরুধূপিতম্॥ **2.17.1** ॥

অপশ্যন্নগরং শ্রীমান্ নানাজনসমন্ৱিতম্।
স গৃহৈরভ্রসঙ্কাশৈঃ পাণ্ডুরৈরুপশোভিতম্॥ **2.17.2** ॥

রাজমার্গং যযৌ রামো মধ্যেনাগুরুধূপিতম্।
চন্দনানাং চ মুখ্যানামগুরূণাং চ সঞ্চযৈঃ॥ **2.17.3** ॥

উত্তমানাং চ গন্ধানাং ক্ষৌমকৌশাম্বরস্য চ।
অৱিদ্ধাভিশ্চ মুক্তাভিরুত্তমৈঃ স্ফাটিকৈরপি॥ **2.17.4** ॥

শোভমানমসম্বাধং তং রাজপথমুত্তমম্।
সংৱৃতং ৱিৱিধৈঃ পুষ্পৈর্ভক্ষ্যৈরুচ্চাৱচৈরপি॥ **2.17.5** ॥

দদর্শ তং রাজপথং দিৱি দেৱপতির্যথা।
দধ্যক্ষতহৱির্লাজৈর্ধূপৈরগুরুচন্দনৈঃ॥ **2.17.6** ॥

নানামাল্যোপগন্ধৈশ্চ সদাভ্যর্চিতচৎৱরম্।
আশীর্ৱাদান্ বহূন্ শৃণ্ৱন্ সুহৃদ্ভিঃ সমুদীরিতান্॥ **2.17.7** ॥

যথার্হং চাপি সম্পূজ্য সর্ব্বানেৱ নরান্ যযৌ।
পিতামহৈরাচরিতং তথৈৱ প্রপিতামহৈঃ॥ **2.17.8** ॥

অদ্যোপাদায তং মার্গমভিষিক্তোঽনুপালয।
যথা স্ম পোষিতাঃ পিত্রা যথা সর্ৱৈঃ পিতামহৈঃ।
ততঃ সুখতরং সর্ৱে রামে ৱৎস্যাম রাজনি॥ **2.17.9** ॥

অলমদ্য হি ভুক্তেন পরমার্থৈরলং চ নঃ।
যদি পশ্যাম নির্যান্তং রামং রাজ্যে প্রতিষ্ঠিতম্॥ **2.17.10** ॥

ততো হি নঃ প্রিযতরং নান্যৎ কিঞ্চিদ্ ভৱিষ্যতি।
যথাভিষেকো রামস্য রাজ্যেনামিততেজসঃ॥ **2.17.11** ॥

এতাশ্চান্যাশ্চ সুহৃদামুদাসীনঃ শুভাঃ কথাঃ।
আত্মসম্পূজনীঃ শৃণ্ৱন্ যযৌ রামো মহাপথম্॥ **2.17.12** ॥

ন হি তস্মান্মনঃ কশ্চিচ্চক্ষুষী ৱা নরোত্তমাৎ।
নরঃ শক্নোত্যপাক্রষ্টুমতিক্রান্তেঽপি রাঘৱে॥ **2.17.13** ॥

যশ্চ রামং ন পশ্যেত্তু যং চ রামো ন পশ্যতি।
নিন্দিতঃ সর্ৱলোকেষু স্বাত্মাপ্যেনং ৱিগর্হতে॥ **2.17.14** ॥

সর্ৱেষু স হি ধর্মাত্মা ৱর্ণানাং কুরুতে দযাম্।
চতুর্ণাং হি ৱযঃস্থানাং তেন তে তমনুৱ্রতাঃ॥ **2.17.15** ॥

চতুষ্পথান্ দেৱপথাংশ্চৈত্যাংশ্চাযতনানি চ।
প্রদক্ষিণং পরিহরঞ্জগাম নৃপতেঃ সুতঃ॥ **2.17.16** ॥

স রাজকুলমাসাদ্য মেঘসঙ্ঘোপমৈঃ শুভৈঃ।
প্রাসাদশৃঙ্গৈর্ৱিৱিধৈঃ কৈলাসশিখরোপমৈঃ॥ **2.17.17** ॥

আৱারযদ্ভির্গগনং ৱিমানৈরিৱ পাণ্ডুরৈঃ।
ৱর্ধমানগৃহৈশ্চাপি রত্নজালপরিষ্কৃতৈঃ ॥ **2.17.18** ॥

তৎ পৃথিৱ্যাং গৃহৱরং মহেন্দ্রসদনোপমম্।
রাজপুত্রঃ পিতুর্ৱেশ্ম প্রৱিৱেশ শ্রিযা জ্ৱলন্॥ **2.17.19** ॥

স কক্ষ্যা ধন্ৱিভির্গুপ্তাস্তিস্রোঽতিক্রম্য ৱাজিভিঃ।
পদাতিরপরে কক্ষ্যে দ্ৱে জগাম নরোত্তমঃ ॥ **2.17.20** ॥

স সর্ৱাঃ সমতিক্রম্য কক্ষ্যা দশরথাত্মজঃ।
সন্নিৱর্ত্য জনং সর্ৱং শুদ্ধান্তঃপুরমত্যগাৎ॥ **2.17.21** ॥

তস্মিন্ প্রৱিষ্টে পিতুরন্তিকং তদা
জনঃ স সর্ৱো মুদিতো নৃপাত্মজে।
প্রতীক্ষতে তস্য পুনঃ স্ম নির্গমং
যথোদযং চন্দ্রমসঃ সরিৎপতিঃ॥ **2.17.22** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে সপ্তদশঃ সর্গঃ ॥